रस्यापि स्वलक्षणेतररूपानतिक्रमात्[1]; स्वलक्षणरूपत्वे स[2] एव दोषः। सामान्यलक्षणरूपत्वे तु ततस्तदुदय एव कथम्[3]? इति वाच्यम्।

स्यादेतद्,—नहि कल्पनाऽस्वलक्षणमेव, तस्या अपि[4] स्वसंवित्तौ स्वलक्षणत्वात्; उक्तं च–"कल्पनाऽपि स्वसंवित्ताविष्टा, नार्थे, विकल्पनात्" इति।

एतदप्ययुक्तम्, अर्थविकल्पाकारव्यतिरेकेण तत्स्वसंवित्त्यसिद्धेः; सिद्धौ वा, कल्पनायोगात्। अतीतकालानुभूतसंस्कारस्तथापरिपच्यमानः स्वलक्षणानुभवजनितसंस्कारोपपादितविशेषो हेतुः, इति चेत्? न, तस्य[5] स्वलक्षणानुभवजनितसंस्काराद्विशेषः, असिद्धेः।

असिद्धिश्च तत्त्वतस्ततोऽनुपकारात्; तथाहि—स[6] तस्य विकल्पाहितसंस्कारविशेषस्या[7]नुत्पन्नस्योत्पन्नस्य निरुद्धस्य[8] वोपकुर्याद्? इति भेदाः। न तावदनुत्पन्नस्य, तस्यैवासत्त्वाद्, असतश्चोपकाराकरणात्; नाप्युत्पन्नस्य, तस्यानाधेयातिशयत्वाद्, अतिशयाधानमन्तरेण चोपकाराभावाद्, अतिशयाधाने[9] च तदन्यत्वप्रसङ्गात्। द्वाभ्याम्[10]प्येकीभूय तदन्यकरणमेवातिशयाधानं, स एवोपकारः, इति चेत्? न, उपादानकारणविशेषाधानमन्त[11]-

१. स्वलक्षणसंस्कारस्य क्षयाक्षयित्वेन *तद्भावकाले च तदसत्त्वादित्ययम्। २ सामान्यरूपसंस्कारक्षणिकत्वप्रतिभासेऽप्यवस्तुत्वात्कुतोऽस्माद्विकल्पज्ञानस्योदयः?। ३. सामान्यस्यार्थक्रियाकारित्वायोगात्। ४. कल्पना। ५. विकल्पोपादानकारणभूतस्यातीतकालविकल्पजनितसंस्कारस्य। ६. स्वलक्षणानुभवजनितसंस्कारः। ७. विकल्पेन घटोऽयमित्येवंरूपेणातीतकाले विशेषो यः संस्कारविशेषः, तस्य। ८. विनष्टस्य। ९. तस्योत्पन्नस्य हि अतिशयाधाने सोऽतिशयो भिन्न एव स्याद्, यद्वातिशयाधानकाले स उत्पन्नोऽन्य एव स्यात्, क्षणादूर्ध्वमनवस्थितेः। १०. अतीतविकल्पजसंस्कारवर्त्तमानानुभवजसंस्काराभ्याम्। ११. अतीतविकल्पजसंस्कारविशेषाधानं विना।

*विकल्पज्ञान०।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



क्ताद्वितीयादिक्षणास्थितिः परिकल्पिता,[1] इति प्रथमक्षणस्थितिरेव[2]। तर्हि द्वितीयादिक्षणास्थितिरित्यत्र चोक्तो दोषः। अथ[3] क्षणस्थितिधर्मकं वस्त्वेव द्वितीयादिक्षणास्थितिः, इति? न, तस्यैवायोगात्; तथाहि–"क्षणस्थितिधर्मकं क्षणस्थितिस्वभावमुच्यते" इत्यादि तदेवावर्त्तते, इति। अथोच्येत–द्वितीयादिक्षणास्थितौ सत्यां प्रथमक्षणस्थितेरभावात्, भावे वा तदनुपपत्तेः,[8] प्रतियोग्यभावादन्यानन्यत्वकल्पनाऽसम्भवतस्तदुत्थदोषाभावः; तथाहि–द्वितीयादिक्षणे तदेव[9] न भवति। नन्वेवमपि[10] तस्यैवास्थितत्वात्[11] स्थितिवत् तदनवस्थितेस्तद्धर्मत्वप्रसङ्गः[12][13], अतद्धर्मत्वे च तदा स्थित्यापत्तिः[14]; तथाहि– द्वितीयक्षणे तस्यैव स्थितिरिति, ततश्च 'स्वहेतुभ्य एव स्थित्यनवस्थितिधर्मकं समुत्पद्यते'[15] इति प्रतिपत्तव्यम्। न चाक्रमवतः[16] कारणात् क्रमवद्धर्माध्यासितकार्योत्पत्तिर्युज्यते, इति। अतो

१. द्वितीयादिक्षणास्थितिः प्रथमक्षणस्थितेव्य.....वंशेनैव परिकल्प्यते त्युच्यते। २. प्रथमक्षणं च इति व्यतिरिक्तत्वात् ...वित्युक्तदोषाभावः, इति पराशयः। ३. अनन्यत्वपक्षोदितः। ४. अथैकस्मिन् वस्तुन्यन्यानन्यत्वविकल्पमसम्भावयन्नेवमाह परः–। ५. एत...ये...क्तम्। ६. प्रथमक्षणस्थितेः। ७. द्वितीयादिक्षणस्थितेः। ८. यदा द्वितीयादिक्षणास्थितिः, तदा प्रथमक्षणस्थितेरभावः; यदि स्याद्भावः, तदा तस्या द्वितीयादिक्षणास्थितेरनुपपत्तिः, तस्य प्रथमक्षणस्थितिभाविनः पदार्थस्य सम्बन्धिनी असौ द्वितीयक्षणभाविनी अस्तु, इति कृत्वा ततश्च पक्षद्वयेऽपि प्रतियोगिनो द्वितीयस्याभावादन्यानन्यत्वविकल्पानुपपत्तिः। ९. यत्प्रथमक्षणेऽभूदिति। १०. सूरिः। ११. स्थितस्यैव। १२. वस्तु। १३. वस्तु। १४. अनवस्थित्यभावे अनवास्थितिकाले। १५. अनवस्थितिधर्मकत्वमेव वस्तुनो दर्शयति। १६. निरंशैकस्वभावत्वेन युगपत्क्रियाकारिणः।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



उच्यते-अनेक[1]धर्मात्मकस्य वस्तुनः[2] समान[3]परिणामः, इति। न चात्र[4] सामान्यवृत्तिपरीक्षोपन्यस्तविकल्पयुगलक[5]प्रभवदोषसम्भवः, समानपरिणामस्य तद्विलक्षणत्वात्[6], तुल्यपरिच्छेद्य[7]वस्तुरूपस्य समानपरिणामत्वात्; अस्यैव[8] च सामान्यभावोपपत्तेः, 'समानानां[9] भावः सामान्यम् इति, यत्[10]समानै[11]स्तथा[12] भूयते' इत्यन्वर्थयोगात्[13], अर्थान्तरभूतभावस्य तद्व्यतिरेकेणापि तत्समानत्वे[14]ऽनुपयोगात्[15], अन्यथा[16], 'समानानाम्' इत्यभिधानाभावादयुक्तैव तत्कल्पना[17]। समानत्वं[18] च भेदाविनाभाव्येव[19], तदभावे[20] च सर्वथैकत्वतः समानत्वानुपपत्तिः, इति समानपरिणाम एव समानबुद्धिशब्दद्वयप्रवृत्तिनिमित्तम्। यतश्चैवम् अतो न य एवासौ[21] एकस्मिन्[22] विशेषे, स एव विशेषान्तरे[23]।

किं तर्हि?

समाने, इति; कुतः सामान्यविचारोदितभेदद्वय[24]समुत्थापराधावकाशः[25]? इति। न चैवं सति परस्परविलक्षणत्वाद् विशेषाणां[26] समानबुद्धिशब्दद्वयप्रवृत्त्यभावः[27], सत्यपि वैलक्षण्ये समानपरिणामसामर्थ्यतः प्रवृत्तेः। असमान[28]परिणामनिबन्धना

---

१. सत्त्वज्ञेयत्वादि। २. घटशरावादेः। ३. मृन्मदित्यभिन्नबुद्धिशब्दद्वयप्रवर्त्तकः। ४. समानपरिणामे। ५. देशकात्स्न्यैकदेशवृत्तिरूप-सामान्यानन्त्यादीनां। ६. एकादिधर्मकसामान्यविलक्षणत्वात्। ७. वैलक्षण्यमेवाह। ८. समानपरिणामस्य। ९. उत्पत्तिरपि कुतः? इत्याह-**समानानामिति**। १०. **यदिति** क्रियाविशेषणं। ११. समानैस्तथाभूयते इत्यनेन समानानामित्यत्र कर्तरि षष्ठीति ज्ञापितम्। १२. समानतया। १३. ...मत्वर्थः समानानामिति सम्बन्धषष्ठी-नः परस्य पक्षे...त्येकार्थेति,। १४. सम्बन्धपक्षे समानानां सम्बन्धिनः तेषां समानानां समानत्वे प्रकृत्यैवेति भावः। १५. अन्तरेणैव ते समाना इति कृत्वा। १६. अन्यथैवानभ्युपगमे, अन्तरेण प्रकृत्या तदसमानत्वे समानानामित्यभिधानाभावात्। १७. अधिकृतभावकल्पनासमानानां भाव इत्येतत्सम्बन्धिनां समानानामितिकृत्वा। १८. तुल्यत्वं। १९. अयं अनन्यसमान इति नीतेः। २०. भेदाभावे। २१. समानपरिणामः। २२. घटादौ। २३. शरावादौ। २४. देशकात्स्न्यें। २५. सदेशत्वादि। २६. घटशरावादीनाम्। २७. हिमाङ्गारादीनामिव। २८. व्यतिरेकमाह-।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रतिपत्तेः किमेकीकरणेन[1] ?। अथापरः[2], इति, अप्रतिपन्नयो[3]रेकीकरणमयुक्तम्, अतिप्रसङ्गात्; तथाहि–अप्रतिपन्नेनापि वि[4]वक्षितेनैव दृश्येनैकी[5]करोति, न दृश्या[6]न्तरेण[7], इति किमत्र नियामकम् ?।

स्यादेतद्, असौ त[8]त्समानजातीयदृश्यसंवेदनाहितवासनाप्रकोपप्रबोधितस्वबीजजन्मा विकल्पः, इति; अतो 'न दृश्या[9]न्तरेण' इत्येतदप्यसङ्गतम्, दृश्यसंवेदनाहितवासनाप्रकोपस्य त[10]त्प्रबोधाक्षमत्वाद्, इति।

एतदावेदितं प्रा[11]ग्, अतो नेह प्रयत्नः, इति; अलं विस्तरेण॥

यच्चोक्तम्–"सङ्केतवशाच्च शब्दात्प्रवृत्तिः, तस्य च विक[12]ल्पमन्तरेणान्यत्र कर्त्तुमशक्यत्वात्" इति; एतदघटमानकम्, विक[13]ल्पेऽपि सङ्केतस्य कर्त्तुमशक्यत्वात्, तस्या[14]प्युत्पत्तिः, अनन्तरा[15]पवर्गित्वात्; तथाहि–तस्मिन्नपि सङ्केतविधिरनुत्पन्ने वा क्रियते ? उत्पन्ने वा ? विनष्टे वा ? इति विकल्पाः। न तावदनुत्पन्ने, असत्त्वात्। नाप्युत्पन्ने, तस्योत्पादसमन्तरमेवापिगमात्; क्षणास्थितिधर्माणि च सङ्केतस्य कर्त्तुमशक्यत्वात्। नापि विनष्टे, विनष्टस्यासत्त्वात्।

---

१. योजनाभावान्न किञ्चिदित्यर्थः २. अप्रतिपाद्यैकीकुर्यादित्ययं पक्षः। ३. भेदेनागृहीतयोः। ४. भेदानागृहीतेनापि। ५. घटेन। ६. विकल्प्यमर्थं घटादिस्वलक्षणेन। ७. अप्रतिपन्नत्वाविशेषात्। ८. तस्य तदानीं प्रवृत्तिविषयस्य। घटस्वलक्षणस्य यः सजातीयो दृश्यो घटस्वलक्षणान्तरं तस्य यत्सङ्केतग्रहणादिकाले संवेदनं तेन यश्चाहितः संस्कारविशेषस्तेनोद्बोधितविकल्पस्य यत् स्वं बीजं शब्दज्ञानं तज्जन्मा। ९. ननु पटादिस्वलक्षणेनैकीकरोति। १०. विकल्प। ११. सत्त्वासत्त्वाधिकारे स्वलक्षणानुभवाहितसंस्कारात् तज्जन्मेति चेत्, न, संस्कारस्यापि स्वलक्षणेतररूपानतिक्रमादित्यादिना निवेदितम्। १२. अपोहं। १३. स्वलक्षणेऽपि विकल्पो ह्ययमपोहः, स च त्रिधा एकस्तावद्व्यावृत्तम् स्वलक्षणमेव, अन्यव्यवच्छेदमात्रं द्वितीयः, विकल्पबुद्धिप्रतिभासस्तु तृतीयः, तत्र प्रथमपक्षाश्रयेणाह–**विकल्पेऽपीत्यादि**। १४. स्वलक्षणरूपविकल्पस्य। १५. विनाशित्वात्।

For Private And Personal Use Only

( ५ )

यदप्युक्तम्-" विरोधिधर्माध्यासितस्वरूपत्वाद्वस्तुनोऽनेकान्तवादिनो मुक्त्यभावप्रसङ्गः " इति-एतदपि सूक्ष्मेक्षिकया मुक्तिमार्गमनालोच्यैवोक्तम् , इति, उक्तवत्सत्त्वानित्यत्वादीनां विरोधित्वासिद्धेः, अन्यथा वस्त्वभावप्रसङ्गात्[1] ॥

किं च विरोधिधर्माध्यासितस्वरूपाभाव एव वस्तुन एकान्तवादिन एव मुक्त्यभावप्रसङ्गः; तथाहि-यदि 'तदात्माङ्गनाभवनमणिकनकधनधान्यादिकमेकान्तेनैवानात्मादिकधर्मयुक्तं भावनालम्बनमिष्यते, हन्त ! तर्हि सर्वथाऽनात्मकत्वाद्भावकभाव्याभावात् तत्परिज्ञानोत्तरकालभाविभावनाऽभावतः[2] कुतः ? कस्य वा ? मोहादिप्रहाणम् ? इति कथ्यतामिदम् ॥

स्यादेतत्[3]—परपरिकल्पिताऽविचालितैकस्वभावात्मापेक्षया तदनात्मकमभ्युपगम्यते[4], न पुनः प्रतिक्षणनश्वरात्मापेक्षया, इति ॥

एतदप्यसारम् , विकल्पानुपपत्तेः; तथाहि-तत्कथंचित्[5]प्रतिक्षणनश्वरं स्यात् ? सर्वथा वा ? । यदि कथंचिद् , अर्हन्मतानुवाद एवः तथा चोक्तमर्हन्मतानुसारिभिः

सर्वव्यक्तिषु[6] नियतं क्षणे[7]ऽन्यत्वमथ च न विशेषः ।
सत्योश्चित्यपचित्योराकृति[10]जातिव्यवस्थानात् ॥१॥" इति।

अथ सर्वथा, हन्त ! तर्ह्यैहिकामुष्मिकसकललोकसंव्यवहाराभावप्रसङ्गः; तथाहि-प्रतिक्षणनिरन्वयेन नश्वरत्वे[11] सत्यात्मादिवस्तुनः ग्राह्यग्राहकभावस्मरणप्रत्यभिज्ञानकुतूहलविरमणाद्यविछदङ्गनादिप्रतीतमपि नोपपद्येत, नहि ग्राह्यार्थतद्ग्राहकसंवेदनयोः कथंचिदपि तुल्यकालताऽभ्युपगम्यते परैः, तयोर्हेतुफलभावाभ्युपगमात् । उक्तं च[12]—

१. अनेकान्तात्मकवस्त्वभाव इत्यर्थः । २. एकान्तेनैवात्मकत्वादिवस्तु । ३. अथैवंमन्यसे । ४. वस्तु । ५. वस्तुपर्यायापेक्षया । ६. घटाद्यासु । ७. क्षणसम्बन्धभेदात् । ८. कथञ्चित्सदादिरूपतया । ९. भावार्थमाह–**सत्योरिति,** चित्रसहकारिसामर्थ्येन १०. संस्थानगत्व । ११. अननुवृत्तिनशनशीलत्वे सति । १२. धर्मकीर्तिना ।

ग्राह्यताविदुर्हेतुत्वमेव[2] युक्तिज्ञा[3] ज्ञानाकारार्पणक्षमम्[6] ” इति ।

एवं च सति ग्राह्यार्थाभावे[4] एव ग्राहकसंवेदनप्रसूतेः, तद्[5]भावभावित्वात् संवेदनस्य, कुतस्तस्य तद्ग्राहकत्वम्[6] ? इतरस्य[7] च तद्ग्राह्यत्वम्[8] ? इति; आदाय युक्तिप्रदीपं तिरस्कृत्य स्वदर्शनाभिनिवेशतिमिरं निभाल्यतामेतद्[9], इति ।

आकारार्पणक्षमत्वमपि तस्यानिश्चितमेव[10] । नहि ‘अनन्तरातीतविषयाकारमेवेदं[11] संवेदनम्’ इति विनिश्चेतुं शक्यते, तस्याग्रहणाद् । अग्रहणं च तदानीमसत्त्वाद्[12][13] । असति च तस्मिंस्तदाकारमेतदतदाकारं[14][15] न भवति, इति अवगमानुपपत्तिः ।

स विद्यमानादेव संवेदनाकारात्[16] तदाकारत्वावगमः[17], इति चेत् ? तथाहि-यद्यद्ग्राहकं न भवति, तत्तदाकारं न भवति, पीताग्राहकमिव[18] नीलसंवेदनम्, तद्ग्राहकं चैतद्; इति कथं तदवगमानुपपत्तिः ? इति ।

एतदप्ययुक्तम्-तत्प्रत्यक्षतानुपपत्तेरनुमीयमानत्वात् । न चानुमानताऽप्यत्र, एवंविधाविनाभावव्यवस्थाकारिणः[19] क्षणद्वयग्राहिणो विज्ञानस्याभावाद्, अभावस्य क्षणिकत्वविरोधात् ।

तदेव विशिष्टं तद्व्यवस्थाकारि[20], इति चेत् ? न, कारणविज्ञानबोधान्वयव्यतिरेकेण[21] कार्यविज्ञानस्य वैशिष्ट्यायोगाद्, अतिप्रसङ्गात्, तद्वदपरस्यापि वैशिष्ट्यापत्तेः[22] ॥

---

१. भिन्नकालं कथं ग्राह्यमिति चेत् । २. अर्थस्य । ३. अनुमानविदः । ४. वस्तुस्थित्या । ५. किमित्यत आह । ६. ग्राह्यत्वेनाभिमतार्थे । ७. अर्थस्य । ८. तदुत्तरकालभाविसंवेदनग्राह्यत्वम् । ९. सूक्ष्माभोगहस्तेन । १०. अर्थस्य । ११. अनन्तरातीतविषयस्य । १२. संवेदनकाले । १३. विषयस्य । १४. विषयाकारं । १५. अन्याकारं । १६. संवेदनगताकारात् । १७. अनन्तरातीतविषयाकारत्वावगमः । १८. यथा नीलसंवेदनं पीताकारं पीताग्राहकं । १९. अनन्तरातीतविषयाकारस्य* । २०. विशिष्टग्राह्यग्राहकभावव्यवस्थेति प्रत्यन्तरे । २१. अर्थसंवेदनयोः । २२. विज्ञानेभ्यः ।

---

* ज्ञानस्य, अविनाभावः ।

स्यादेतत्—समा[1]नकालयोरेव ग्राह्यग्राहकभावः; तथाहि-स्वहे[2]तुभ्य एव तद्विज्ञानं विशिष्टसमानकालभाविभावग्राहकस्वभावम्, भावोऽपि तद्ग्राह्यस्वभाव एवोत्प[3]द्यते; इति यथोक्तदोषानुपपत्तिः।

न, त[4]योस्तादात्म्यतदुत्पत्त्यनुपपत्तेः प्रतिबन्[5]धाभावात्। इत्यलं प्रसङ्गेन, विजृम्भितमेवाऽत्रास्मत्स्वयू[6]थ्यैः; इति ॥ स्मरणाद्यसम्भवस्तु प्रतिक्षणनिरन्वयेन नश्वरत्वे सति वस्[7]तुनः सुभाव्य एव। नह्यन्[8]येनान्[9]यस्मिन्ननुभूतेऽन्[10]यस्यान्योपल[11]ब्धौ स्मरणप्रत्यभिज्ञादयो युज्यत इति। ए[12]वम्, ऐहिकसकललोकसंव्यवहाराभावः, इति स्थितम्, आ[13]मुष्मिकव्यवहारस्तु सुतरामसङ्गतः, कृतनाशाकृताभ्यागमप्रसङ्गात्; तथाहि–यः कुशले प्रवर्त्तते स तदैव सर्वथा विन[14]श्यति, कुशलमपि च कर्मात्मलाभसमनन्तरमेव निरन्वयमपैति, अतः कृतना[15]शः, क्षणान्तरस्य चिरविनष्टात्कर्मणः पुनरायत्यां फलोदयाभ्युपगमे सत्यऽकृताभ्याग[16]मः, इत्येतच्चासमञ्जसम् ॥

तथा मुक्तिरपिप्राणिनामसङ्गतैव; तथाहि–तीव्रतरवेदनाविभि[17]न्नशरीरः संसारविमुखया प्र[18]ज्ञया विभावितसंसा[19]रदोषो निरास्थो जिहासुर्भवमुपाञ्चिस्सुर्निर्वाणं रागादिक्लेशपक्षविक्षोभक्षममामुखीकृत्य मा[20]र्गममलं क्रमेणावदायमानचित्तसन्ततिर्निरतिशयपेशलर[21]समास्वादयति निर्वृतिमिति न्यायः, अयं च प्रतिक्षणनिरन्वयनश्वरत्वे सति आत्मादिवस्तुनो न घ[22]टामुपैति, तथा-हिअन्य एव दुःखैः सांसारिकैः पीड्यते, अन्यश्च निर्विद्यते,

१. स्वहेतोरेव। २. भावात्। ३. अर्थसंवेदनयोः। ४. समकालतयेति भावः। ५. दिवाकरादिभिः। ६. सचेतनादेः। ७. प्रमात्रा। ८. प्रमेये। ९. प्रमातुः। १०. प्रमेयान्तरोपलब्धौ। ११. यथोक्तनीत्या। १२. पारत्रिकः। १३. कर्मफलसम्बन्धादिभिः। १४. तदा फलमदत्त्वैव नाशात्। १५. निरन्वयनश्वरत्वात्। १६. सन्। १७. लोकोत्तरया। १८. जन्मादिभावेन। १९. संयोगवियोगसारत्वात् संसारस्य। २०. सम्यग्दर्शनादि। २१. प्रीतिं। २२. ततोऽत्यन्तभेदात्।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथ तयोरेककालता तत्र वक्तव्यम्, किं सर्वात्मना? उत कथञ्चित्? यदि सर्वात्मना, ततोऽसम्भव एव, कार्याभावात्; नहि सर्वात्मना कारणतातादवस्थ्ये कार्यजन्म युज्यते, इति प्रतीतम्। अथ कथञ्चिद्, एवं तर्ह्यस्मन्मतानुवाद एव, केनचिदात्मना कार्यकारणयोरेकत्वाभ्युपगमात्।

अथ कारणधर्मसङ्क्रान्तिः, साऽप्यघटमाना, कार्यकारणयोरत्यन्तं भेदाभ्युपगमात्, कारणव्यतिरिक्तस्य च धर्मस्यासम्भवात्; तत्सङ्क्रान्तौ वान्वयप्रसिद्धिप्रसङ्गात्।

अथ साधारणवस्तुसम्बन्धित्वम्, तदप्ययुक्तम्, साधारणवस्तुनोऽभावात्, स्वलक्षणानां वस्तुत्वात्, तेषां च मिथोऽत्यन्तभिन्नत्वात्, अतत्कारणात् तत्कार्यव्यावृत्तेश्च वाङ्मात्रत्वात्, स्वरूपव्यतिरेकेण सर्वभावानामेव सर्वभावेभ्यो विशेषेण व्यावृत्तेः। विशेषाभ्युपगमे च पर्यायतः समानपरिणामाभ्युपगमप्रसङ्गात्।

अथैकार्थक्रियाहेतुत्वम्, तदप्यसङ्गतम्, तस्यासिद्धत्वात्; नहि हेतुफलयोरेकार्थक्रियाहेतुत्वमस्ति, यौगपद्याभावात् हेतु-

---

१. हेतुफलयो। २. यदि सर्वेण स्वरूपेण कारणं कार्यञ्च एकस्मिन् कालेऽभ्युपगम्यते, तदैतयोरेककालताया असम्भव एव। ३. द्रव्यस्वरूपेण। ४. नहि कारणाद् व्यतिरिक्तः कश्चित् कारणधर्मः। ५. कारणः। ६. मृत्पिण्डघटयोर्यत्साधारणस्ततो मृदः सम्बन्धित्वमिदमेव वैशिष्ट्यं हेतुफलयोः। ७. उभयसाधारणस्य मृदादिसामान्यस्याभावात्। ८. स मृत्स्वभावः कारणं यस्यासौ तत्कारणो मृत्पिण्डघटादिर्न तत्कारणे तत्कारणो जलादिः। एवंतस्य मृत्स्वभावस्य कार्यं तत्कार्यं घटादिः, न तत्कार्यमतत्कार्यजलाद्येव तद्व्या...साधारणाया असम्बन्धित्वं मृत्पिण्डघटयोः सविशेषहेतुफलभाव इति चेत्, न,। ९. सजातीयेभ्यो विजातीयेभ्यश्च। १०. नहि यथा विजातीयेभ्यो व्यावृत्तिस्तथैव सजातीयेभ्योऽपि कथञ्चिद्व्यावृत्तिरपीति। ११. तथाहि-हेतुफलयोर्यौगपद्यं स्यात्तदैतयोरेकार्थक्रियाहेतुत्वं स्यात्। अथ यौगपद्यमेतयोरभ्युपगम्यते तदा हेतुफलभाव एव न घटते। नहि समसमयभाविनोर्गोविषाणयोर्हेतुफलभावः।

For Private And Personal Use Only

सदसद्रूपादित्वे विरोधिधर्माध्यासितस्व[1]रूपाभिधानं न्याय्यम्। अ[2]तथा भावे तद[3]भावप्रसङ्गतो विरोधासिद्धेः, इत्युक्तं प्राक्। न च पै[4]रैरपि स्वलक्षणेषु[5] साधारण[6]प्रमेयता भ्रान्तौ चाभ्रान्ता स्वसंविन्नष्यते, तेषां स्वलक्षणादीनां प्रमेयतादिभावापत्तेः, इति। न विपश्चितस्तथा विरोधाभिधानं वैपश्चित्याविरोधि, तत्तथा[9]ऽभावे सकलव्यवहारा[10]भावप्रसङ्गात्। अप्रमेय[11]त्वेन स्वलक्षणेषु प्रमाणाप्रवृत्तेः। भ्रा[12]न्तौ च स्वसंविदभावप्रसङ्गात्, न चैतदात्माङ्गनाभवनाद्यनात्मकमनित्यमशुचिदुःखमेव, अन्वयस्यैवात्मत्वात्, तस्य च व्यवस्थापितत्वात्। एवं नानित्यमेव, तदतादवस्थ्यात्। अन्यथा, तदनु[13]पपत्तेः। नाशुच्येव, शुभपरिणामभावात्, लोके जलेन शुचिकरणेन तथोपलब्धेः। एवं न दुःखमेव, मुक्तिसुखजनकत्वात्, पारम्पर्येण तत्स्व[14]भावत्वाद्, इति।

किञ्च-अनात्मकं शून्यमसं[15]दित्येकोऽर्थः, अनित्यमस्थिरं सदिति च। ततश्च यद्यनात्मकम्, कथमनित्यम्? अथानित्यम्, कथमनात्मकम्? इति। कथं च बुद्धधर्मसङ्घलक्षणे परमनिर्वृतिहेतौ निर्दोषे महारत्नत्रये सति इदं वक्तुमुचितम्? यदुत सर्वमेवाशुचि, सर्वमेव दुःखम्, इतिः तदाशातनापत्ते[16]रसदभिधानात्। अन्यथा, रत्नत्रयायोगः, तदन्[17]या शुच्याद्यविशेषात्; योगे[18] वातिप्रसङ्गः।

एवं च[19], 'तथा ह्येते तदात्माङ्गना भवनमणिकनक' इत्यादि ग्रन्थ इति कृत्वेत्यन्तं यदुक्तम्, तत्परपक्ष उक्तिमात्रमेव, उक्त-

१. कोण वर्त्तनात्। २. सदसद्रूपाभावे। ३. वस्तु। ४. बौद्धैः। ५. स्वाभ्युपगतेषु वस्तुषु। ६. सामान्य। ७. विरोधिधर्माभिधानं। ८. विरोधेव। ९. तेषां स्वलक्षणादीनां साधारणप्रमेयतादिरूपेणाभावे। १०. व्यवहाराभावमेव दर्शयति। ११. साधारणप्रमेयताभावे। १२. विकल्पात्मिकायाम्। १३. तुच्छभावत्वेन तादवस्थ्यानुपपत्तेः। १४. मुक्तिसुखजनकत्वात्। १५. पर्यायशब्दाः सर्वे इत्यर्थः। १६. अस्मद्रत्नत्रयस्याशुच्यादि इत्थं चैतदशाकर्त्तव्यम्। अन्यथा तद्रत्नत्रयमेव न स्यात्। १७. तस्माद्रत्नत्रयादन्ये ये शुच्यादयः। आदिपदं दुःखग्रहः तैः सह विशेषः स्याद्रत्नत्रयस्य। १८. अशुच्याद्यविशेषेऽपि रत्नत्रययोगे। १९. कृत्वा।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चैककालैकद्रव्याभावतो विरोधः; यतः—एकस्मिन्नेव काले एकस्मिश्च द्रव्येऽनयोरभाव एव; तथाहि—धूपकडुच्छकस्थालकेऽग्निसम्बन्धे उष्णस्पर्शो भवति, तस्यैव तु गण्डे[1] शीतः, इति; न च विरोधः, एककालैकद्रव्यैकप्रदेशासम्भवविरोधस्त्विष्ट[2] एव, एकप्रदेशस्यापरदेशाभावेनावयवावयविभेदानुपपत्तेर्भिन्नधर्मत्वात्[3]। भिन्नधर्मयोश्चैकत्वं विरुद्धमेव[4], अन्यथा तद्भेदाभाव[5]प्रसङ्गात्। न[6] चैवं सदसन्नित्यानित्यादिभेदानां भिन्नधर्मत्वम् एकत्रैव भावात्, भावस्य च 'यतस्तत्स्वद्रव्यक्षेत्रकालभावरूपेण सत्, परद्रव्यक्षेत्रकालभावरूपेण चासद्' इत्यादिना प्रतिपादितत्वात्। ततश्च नासम्भवभाविना विरोधेन नियमभाविनामपि विरोधकल्पना न्याय्या[7], अतिप्रसङ्गात्। नहि श्रावणत्वं विरुद्धमपि घटादिसत्त्वेन नासत्तया विरुद्ध्यते, तथोपलम्भात्, 'अनुभवप्रमाणकाश्च सन्तोऽर्थाधिगमे' इति, अन्यथा, तदभाव[9]प्रसङ्गात्। अभिन्ननिमित्तत्वेनापि विरोधः सिद्ध एव। नहि यदेव शीतस्पर्शस्य निमित्तं तदेवोष्णस्पर्शस्य, भेदा[11]भावात्, तत्सङ्करोपलब्धिप्रसङ्गाच्च। न च सदसदादिधर्माणामभिन्ननिमित्तता, निमित्त[12]भेदाभ्युपगमाद्। न चैकस्मिन्निमित्तभेदो न युक्तः,

---

१. दण्डके। २. एकस्मिन् काले एकस्मिन् द्रव्ये एकस्मिन् प्रदेशेऽसम्भवलक्षणो विरोधः, शीतोष्णस्पर्शयोरभ्युपगम्यत एवेत्यर्थः। ३. शीतोष्णस्पर्शयोरभ्युपगम्यत एवेत्यर्थः। ४. शीतोष्णस्पर्शयोः। ५. तयोर्धर्मयोर्भेदः ६. यथा शीतोष्णस्पर्शयोस्तथा। ७. विरोधो हि असम्भवे सति भवति, नि[illegible] भाविनां च को नाम सम्भवः?। ८. श्रावणत्वं हि घटादिसत्त्वेन सह वि[illegible] मपि नहि सन् घटादिः श्रावणो नाम। परसत्त्वेनापि सहननविरुद्ध्यते, [illegible] तु विरुध्यत एव, अन्यथा श्रावणत्वमसद्रूपमेव स्यात्। ततो यदि श्राव[illegible] घटादिसत्त्वेन सह विरुद्धं, कथं तदसत्त्वेनापि सह विरुद्धं? अथासत्त्वेन [illegible] विरुद्धं कथन्तर्हि घटादिसत्त्वेनापि विरुद्धं? सत्त्वेनासत्त्वेन च सहैकस्य विरोधो विरुद्धः, इत्येवं यथा नात्र विरोधकल्पना, तथा दृष्टत्वेन सम्भवाभावाद्, एवं न सदा तदात्मके वस्तुनि विरोधकल्पना न्याय्येति भावः,। ९. यद्यनुभवप्रमाणकाः सन्तो न भवन्ति तदा ते सन्त एव न स्युरित्यर्थः। १०. शब्द एव। ११. यदि हि शीतोष्णस्पर्शयोरेकत्वमेव स्यात् तदैतयोर्भेदो न स्यादित्यर्थः। १२. शीतोष्णस्पर्शयोः स्वद्रव्यादिरूपेण सत् परद्रव्यादिरूपेण चासादित्युक्तम्।

For Private And Personal Use Only

